# A-III/1/22AVDS3CCTC1/23

## तृतीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-24)

## वेदः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. अग्निष्टोममन्त्राः कस्मिन् अध्याये प्रोक्ताः सन्ति?
2. महीनां पयोऽसीति मन्त्रेण अभ्यङ्कनं केन द्रव्येण क्रियते?
3. युयोधि इति शब्दस्य कोऽर्थः?
4. इदं विष्णुर्विचक्रमे इति मन्त्रस्य विनियोगः कस्मिन् कर्मणि भवति?
5. इरावती शब्दस्य कोऽर्थः?
6. चित्पतिः कः भवति?
7. औद्ग्रभणमन्त्राः कति सन्ति?
8. श्वात्राः इति शब्दस्य यथाविनियोगम् अर्थं लिखत।
9. चतुर्थाध्याये कति कण्डिकाः सन्ति?
10. अरेपसौ इति शब्दस्य कोऽर्थः?
11. आपतिः इति शब्दस्य अर्थं महीधरानुसारं लिखत।
12. सोमयागे कति ऋत्विजः भवन्ति?
13. आहवनीयः कस्यां दिशि भवति?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. भवतं नः समनसौ सचेतसावरेपसौ।

 मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः॥ –इति मन्त्रं महीधरानुसारं व्याख्यात।

15. इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।

समूढमस्य पांसुरे स्वाहा॥ –इति मन्त्रं विनियोगनुसारं व्याख्यात।

16. आ वो देवास ईमहे वामं प्रत्यध्वरे।

आ वो देवास आशिषो यज्ञियासो हवामहे॥ –इति मन्त्रं व्याख्यात।

17. अग्ने त्वं सुजागृहि वयं सुमन्दिषीमहि।

रक्षाणो अप्रयुच्छन्प्रबुधे नः पुनस्कृधि॥ –इति मन्त्रं व्याख्यात।

18. अग्नेस्तनूरसि. . . . . .विष्णवे त्वा॥ –इति मन्त्रं सविनियोगं व्याख्यात।

19. सावित्रहोमादूर्ध्वं प्राचीनवंशाख्यशालायां शकटस्य प्रवर्तनं विशदयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. सोमयागस्यानुष्ठानवैशिष्ट्यं प्रतिपादयत।

21. चतुर्थ–पञ्चमाध्याययोः वर्णितांशान् प्रतिपादयत।

22. एदमगन्म देवयजनं पृथिव्या. . . . .मैनं हिंसीः॥ –इति मन्त्रं विनियोगप्रदर्शनपूर्वकं व्याख्यात।

# A-III/2/22AVDS3CCTC2/23

## तृतीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-25)

## वेदः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. मर्याः इति कस्य नाम?
2. सिलिकमध्यमाः इति शब्दस्य कोऽर्थः?
3. तितउ शब्दस्य कोऽर्थः?
4. स्वाध्यायादौ कः शब्दः प्रयोक्तव्यः?
5. आदौ अथकारस्य प्रयोगः कुत्र भवति?
6. यमवर्णाः कुतः उच्चारिताः भवन्ति?
7. मुखनासिकाकरणं किमुच्यते?
8. व्यञ्जनस्य कति मात्रा भवति?
9. वाशी इति शब्दस्य कोऽर्थः?
10. द्विस्तावान् दीर्घः इति सूत्रस्य कोऽर्थः?
11. एकचक्रम् इति शब्दस्य निरुक्तदिशा अर्थं लिखत।
12. अदितिशब्दस्य निर्वचनं लिखत।
13. के वर्णाः सोष्माः कथ्यन्ते?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. योजनात्र परम्, भोजनं मधुरं स्निग्धम् इति सूत्रे व्याख्यात।
15. ओङ्काराथकारौ इति सूत्रं व्याख्यात।

16. सक्तुमिव तितउना पुनन्तो.....वाचि॥ इति मन्त्रं निरुक्तदिशा व्याख्यात।

17. तत्सूर्यस्य देवत्वं.....सिमस्मै॥ इति मन्त्रं निरुक्तदिशा प्रतिपादयत।

18. शरीरम्, शारीरे इति सूत्रयोः व्याख्यानं कुरुत।

19. जुष्टो दमूना इति मन्त्रं निरुक्तदिशा व्याख्यात।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. प्रातिशाख्यानुसारं वेदाध्ययनविधिं वर्णयत।

21. निरुक्तस्य महत्त्वं प्रतिपादयत।

22. प्रातिशाख्यस्य वैशिष्ट्यं प्रतिपादयत।

# A-III/3/22AVDS3CCTC3/23

## तृतीयसत्रार्द्धः

## तृतीयपत्रम् (DSCC-26)

## वेदः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. होतृषदनं नाम किम् ?
2. पिण्डपितृयज्ञार्थं चरुश्रपणं कस्मिन् अग्नौ भवति ?
3. पिण्डपितृयज्ञे फलीकरणं कति वारं भवति ?
4. चतुरवत्तं सवषट्कारासु इति सूत्रस्य कोऽर्थः ?
5. अस्तु श्रौषट् इति कः प्रत्याश्रावयेत् ?
6. प्रतिप्रणवमाधानम् इति सूत्रस्य कोऽर्थः ?
7. जुहूपभृतोः सर्वहोमेषु धारणं कुत्र कुर्यात् ?
8. कात्यायनश्रौतसूत्रे कति अध्यायाः सन्ति ?
9. दर्शपूर्णमासे कति ऋत्विजः भवन्ति ?
10. होता कस्य वेदस्य ऋत्विक् भवति ?
11. आज्यभागस्य देवता का ?
12. दाक्षायणयज्ञो नाम किम् ?
13. आग्रयणेष्टेः अनुष्ठानं कदा भवति ?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. पिण्डपितृयज्ञं विवृणुत।
15. आधानकालनिरूपणं कुरुत।

16. पुनराधानं विशदयत।

17. बृहदुपस्थानं विवृणुत।

18. यजमानार्षेयवरणं यथासूत्रं प्रतिपादयत।

19. अग्निसम्मार्जनप्रकारं निरूपयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. दर्शे पलाशशाखाच्छेदनं विवृणुत।

21. कात्यायनश्रौतसूत्रस्य महत्त्वं प्रतिपादयत।

22. आग्रयणेष्ट्यनुष्ठानप्रकारं यथासूत्रं प्रतिपादयत।

# A-III/4/22AVDS3CCTC4/23

## तृतीयसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-27)

## वेदः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. जैमिनीयन्यायमालायाः मङ्गलश्लोकं लिखत।
2. चोदनालक्षणोऽर्थो धर्मः इति सूत्रं कस्य अस्ति?
3. यवशब्दं आर्याः कस्मिन् अर्थे प्रयुञ्जन्ते?
4. पिकशब्दस्य कोऽर्थः?
5. कल्पादीनां प्रामाण्यं मीमांसामते अस्ति न वा?
6. प्राजापत्या गायत्री इति छन्दसि कति अक्षराणि भवन्ति?
7. छन्दःसूत्रस्य लेखकः आचार्यः कः?
8. सगणस्य लक्षणं किम्?
9. यगणस्य लक्षणं किम्?
10. आसुरी बृहती इति छन्दसि कति अक्षराणि भवन्ति?
11. द्वादशलक्षणी इति शब्देन कः ग्रन्थः गृह्यते?
12. जैमिनीयन्यायमालायां कति न्यायानां संग्रहः कृतः अस्ति?
13. ब्राह्मी गायत्री इति छन्दसि कति अक्षराणि भवन्ति?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. होलाकाधिकरणं निरूपयत।
15. वेदस्य अपौरुषेयत्वं निरूपयत।

16. दृष्टं वरमदृष्टत: इति सिद्धान्तं सोदाहरणं प्रतिपादयत।
17. जह्यादासुरी इति सूत्रं सोदाहरणं स्पष्टयत।
18. ध्राऽदिपर: इति सूत्रं व्याख्यात।
19. गृल्, गन्ते इति सूत्रे व्याख्यात।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. धीश्रीस्त्रीम् इति सूत्रं व्याख्यात।
21. लभ्यमाने फले दृष्टे नादृष्टफलकल्पना इति सिद्धान्तं प्रतिपादयत।
22. गायत्र्यादि सप्त छन्दसाम् अष्टौ प्रभेदान् वर्णयत।